# विषयवस्तुदृष्ट्या *काव्यालङ्कारस्यानुशीलनम्*

गिरिराजखतिवडा *

**सार :**

*काव्यशास्त्रस्येतिहासे भरतादनन्तरं भामहात्पूर्वं बहवो वर्षाः व्यतीताः । तस्मिन् समये समुत्पन्नानामाचार्याणां नामानि, काव्यशास्त्राणि च नोपलभ्यन्ते । अस्य महानुभावस्य काव्यालङ्कार एव भरतपश्चाद्वर्ती सर्वप्रथमो मान्यग्रन्थश्चकास्ति । काव्यालङ्कारः काव्यशास्त्रस्य सर्वप्राचीनो ग्रन्थः स्वीकृतोऽस्ति । भरतस्य नाट्यशास्त्रं ततः प्राक्कालस्यैव मन्यते । कुत्रचिद् भरतस्य नाट्यशास्त्रं नाटकविषयसम्बद्धं वर्तते । अस्य काव्यशास्त्रं नाट्यशास्त्रादभिन्नं विषयं वर्णयति तस्मादस्य ग्रन्थः स्वतन्त्र इत्यनुभूयते । काव्यालङ्कारे काव्यस्य सम्पूर्णेष्वङ्गेषु चर्चा विहिता दृश्यते । भामहेन "शब्दार्थौ सहितौ काव्यम्" इत्युक्त्वा काव्यस्वरूपं निर्धारितम् । तदुत्तरवर्तिभिः मम्मटादिभिराचार्यैरस्यानुशरणं विहितम् विलोक्यते । अतएवास्मिनध्ययने भामहस्य काव्यालङ्कारस्य विषयवस्तुदृष्ट्या अध्ययनं विहितमस्ति ।*

**शब्दकुञ्जी** - शब्दार्थौ, काव्यालङ्कारः, काव्यशास्त्रं, वक्रोक्तिः, महाकाव्यम्, सम्प्रदायः ।

## १. पृष्ठभूमिः

संस्कृतकाव्यशास्त्रस्य परम्परायामलङ्कारसिद्धान्तस्य प्रवर्तकस्य भामहस्य जीवनवृत्तविषये स्वल्पमेव ज्ञानं प्राप्यते । भामहस्य जन्मख्यानं काश्मीर इत्युल्लिखितमस्ति । ण्हूलराचार्येण व्याख्यातां काव्यालङकारस्य प्राप्तां पाण्डुलिपिमाश्रित्यैषदाक्षिणात्येति स्वीकृतेऽपि न युक्तिसङ्गतः । तस्मिन् देशे रचितेषु प्राचीनग्रन्थेषु भामहस्य नामोल्लेखनमासीदिति काश्मिरस्था विद्वांसो लिखन्ति । उद्भटेन चैवमुल्लिखितः । काव्यालङकारस्यान्तिमपद्यमाश्रित्य एष रक्रिलगोमिनस्य पुत्र आसीदिति काव्यालङ्कारस्य मङ्गलाचरणपद्ये समुल्लिखितमस्ति । एष बौद्धधर्ममनुशरतिस्म । परन्त्वनेन विरचितेषु कस्मिन्नपि ग्रन्थेषु बौद्धमतस्योल्लेखो नोपलभ्यते । अतो ऽस्य ग्रन्थेषु हिन्दूमतावलम्बिनां महापुरुषाणां समुल्लेखनात् एषः हिन्दूमतानुयायी आसीदिति वक्तुं शक्यते ।

भामहस्य समयनिर्धारणविषये मतमतान्तराणि दृश्यन्ते । कुत्रचिदस्य समयः षष्ठशताब्द्याः मध्यभागः आसीदिति मन्यते । काव्यालङ्कारनामके ग्रन्थे न्यायसिद्धान्तस्योल्लेखो विहितः प्राप्यते । न्यायसिद्धान्तस्य बौद्धविदुषा दिङ्नागस्य सिद्धान्तद्वारानुप्राणितत्वेन तस्य समयः सम्भवतः चतुर्थखृष्टाब्दे स्वीक्रियते । एतेनान्येष्वाचार्येषु मध्ये दण्डि-आनन्दबर्न्धनाभ्यां स्वस्मिन् कृतौ भामहस्य सिद्धान्तस्य व्याख्यानात् विद्यते । (डा. कृष्णकुमार, १९९८ : ६६ )

## २. समस्याकथनम्

क) काव्यालङ्कारे कानि काव्यतत्त्वानि सन्ति ?

ख) किञ्च तेषां स्थानम् ?

## ३. अध्ययनस्योद्देश्यम्

* *उपप्राध्यापकः ने.सं.वि.पिण्डेश्वरविद्यापीठम्, धरानः ।*

क) काव्यालङ्कारस्य काव्यतत्त्वानां परिशीलनम्

ख) काव्यतत्त्वानां स्थाननिरूपणम्

**४. अध्ययनस्य सीमाङ्कनम्**

काव्यालङ्कारे प्रस्तुतानां विषयवस्तूनां सैद्धान्तिकमान्यतानुसारेणाराधारेण विश्लेषणमत्र विहितमस्ति । काव्यालङ्कारे प्रस्तुतानां काव्यतत्त्वानामध्ययनमेवास्याध्ययनस्य सीमाङ्कनं वर्तते ।

**५.अध्ययनविधिः**

अध्ययनेऽस्मिन् विषयसम्बद्ध ग्रन्थानामुपयोगो विहितः । विशेषतो निगमनविधिः स्वीकृतः । सङ्कलित सामाग्रीणां व्यवस्थापन सन्दर्भे वर्णनात्मकविधिरङ्गिकृतोऽस्ति ।

**६. पूर्वाध्ययनसमीक्षणम्**

अध्ययनकार्यमिदं सम्पादयितुं पौरस्त्यकाव्यशास्त्रमेव सैद्धान्तिक रूपेणाङ्गीकृतमस्ति । भामहप्रतिपादितदिशा काव्यलङ्कारे स्थापितानां काव्यतत्त्वानामध्ययनस्याधारग्रन्थस्तु स एवास्ति । भामहस्यालङ्कारसिद्धान्त एवास्याध्ययनस्य प्रमुखः सिद्धान्तः । अस्य पूर्वमभवन् अनुसन्धानानां सूक्ष्म रूपेणाध्ययनं विहितमस्ति । अस्मिन्नध्ययनस्य पूर्णतायाः भामहस्य काव्यालङ्कारनामकं पुस्तकमाधारग्रन्थमस्ति ।

**७. भामहस्य कृतिः**

भामहस्य काव्यालङ्कारः नामको ग्रन्थोऽधुना समुपलभ्यते परन्तु राघवभट्टेन अभिज्ञानशाकुन्तलस्य टीकायां भामहस्य नामोच्चारणपूर्वकं कानिचिद्वाक्यनि समुल्लिखितानि । यानि उद्धरणानि राघवेनोद्धृतानि-उद्धरणानि काव्यालङ्कारे पर्यायोक्तिअलङ्कारस्याप्राप्ते । येन विदुषा काव्यालङ्कारं विहायान्यः कोऽपि ग्रन्थं न रचितः इत्यनुमीयते । संस्कृतकाव्यशास्त्रे भामहस्य स्थानमतीव महत्त्वपूर्णं दृश्यते । भरतमुनेः पश्चाद् काव्याशास्त्रस्य रचयिता भामहः अस्ति । अनेन येन रूपेण भरतमुनीन् नाट्यशास्त्रस्य प्रवर्तको मन्यते तथैव रूपेण भामहः अलङ्कारशास्त्रस्य प्रथमः आचार्यः मन्यते । अलङ्कारसिद्धान्तस्य सन्दर्भे अन्यैरुत्तरवर्तीभिराचार्यैश्च भामहस्य लाक्षणिकग्रन्थस्य काव्यालङ्कारस्य महत्त्वं स्वीकृत्य प्रमाणरूपेणोल्लिखितम् विद्यते । न केवलमुत्तरवर्तिभिः परन्त्वाधुनिकैः भारतीयै विद्वद्भिः, पाश्चात्यैश्च विद्वद्भिरस्य प्रभावविषयवस्तुनश्च ग्रहणं कृतम् । पौरस्त्यकाव्यशास्त्रपरम्परायामत्यन्तं महत्त्वपूर्णस्थानं गृह्यमाणस्यास्य निम्नलिखिताः विशेषतामाश्रित्याधारः प्रस्तूयते ।

**८.काव्यालङ्कारस्य संरचना**

भामहस्य काव्यालङ्कारे षट् परिच्छेदाः सन्ति । तत्र काव्य स्वरूपं नामकमेकमध्ययनं, काव्यशरीरं द्वितीयम्, अलङ्कारस्तृतीयं तत्त्वं, दोष, न्याय-निर्णय एवं शब्दशुद्धि पञ्चविषया विश्लेषिता दृश्यते । (हिरा, २०२६ : ३३ ) चतुश्शतम् ४०० (शच्चत्वारः) श्लोकाः सन्ति । अस्य प्रथम परिच्छेदे षण्ठ्यधिकशतम् (१६०) पद्येषु काव्यस्य साधन-लक्षण-भेदानां चर्चा विहिता । द्वितीय-तृतीयपरिच्छेदयो-अलङ्कारस्य चर्चास्ति । चतुर्थपरिच्छेदे पञ्चाशत् पद्येषु भरतेन प्रतिपादितानां दशगुणानां चर्चा विद्यते । पञ्चमपरिच्छेदे सप्तति पद्ये काव्यदोषास्तेषां समाधानोपायं विद्यते । शब्दज्ञानं-न्यायज्ञानञ्च षष्ठमपरिच्छेदे षष्ठी पद्ये शब्दशुद्धीकरणसम्बन्धिता विस्तृता व्याख्या विद्यते ।

## ९. विषयवस्तुदृष्ट्या काव्यालङ्कारस्यानुशीलनम्

काव्यशास्त्रस्येतिहासे नाट्यशास्त्रादनन्तरं काव्यालङ्काराणां द्वितीयस्थानं दृश्यते । अस्य काव्यशास्त्रं नाट्यशास्त्राद्भिन्नं विषयं वर्णयति तस्मादेषः ग्रन्थः स्वतन्त्र इत्यनुभूयते । काव्यालङ्कारे काव्यस्य सम्पूर्णेष्वङ्गेषु चर्चा विहिता दृश्यते । भामहेन "शब्दार्थौ सहितौ काव्यम्" इत्युक्त्वा काव्यस्वरूपं निर्धारितम् । तत उत्तरवर्तिभिः मम्मटादिभिराचार्यैरस्यानुशरणं विहितम् विलोक्यते । काव्यस्यात्मनो मुख्यतत्त्वस्य विषये ऽनेन किमपि नोक्तम् । काव्यस्यात्मनो विषयो नवम-शताब्द्यामाचार्यानन्दवर्द्धनेन चर्चा विहिता । अस्मिन् ग्रन्थे काव्यस्य प्रधानाङ्गे गुणः, रसालङ्कारादिषु, विशदं विश्लेषणं विधाय त्रिगुणवादस्य स्थापना विहिता वर्तते । उत्तरवर्तिभिराचार्यै श्त्रिगुणवादः स्वीकृतः । तेषां परिभाषायाः विषये मतैक्यं न दृश्यते ।

### ९.१ काव्यम्

शब्दार्थसहितौ काव्यमिति काव्यलक्षणम् स्वीकृतम् । शब्दार्थयोः सहभावेन काव्यम् जायते । अत ज्ञायते यत् शब्दार्थयोः कलात्मकसंयोजनमेव काव्यम् । भामहेन शब्दार्थयोः सौन्दर्यसाधनयोः सहभावादेव काव्यं भवतीति साधितम् । अनेनोभयोः शब्दार्थयोर्वक्रता एव काव्यं स्वीकृतम् । अस्यानुसारेण काव्यस्य मूलतत्त्वम् वक्रोक्तिरस्ति । अनेन वक्तुं शक्यते यत् काव्यस्य मूलतत्त्वमलङ्कारः । विलक्षणान्भावान्, विलक्षणशब्देन, विलक्षणरूपेण च प्रस्तुतीकरणं अलङ्कारः इत्यनुभूयते इत्यस्य धारणा दृश्यते । प्राचीनाचार्यो भामहः काव्यालङ्कारे उपर्युक्तम् काव्यलक्षणम् अभिधत्ते । शब्दार्थयोः समन्वयेन काव्यस्य शरीरमेव निर्धायते । दण्डिना भामहस्य शब्दार्थौ इति पदं विशदरूपेण विश्लेषितं दृश्यते । (सुधांशु, सन् २०१२ : १२१)

### ९.२ काव्यकारणम्

भामहेन काव्यहेतोर्विषये विशिष्टज्ञानवान्नेव कविर्भवतीति विचारः प्रस्तुतः । काव्यस्य रचयिता व्याकरणछन्दकोशार्थइतिहासकथालोकव्यवहारेषु, तर्कशास्त्रकलादिषु च निपुणो भवेत् । प्रतिभा व्युत्पत्तिः अभ्यासः एते काव्यस्य हेतवः सन्ति । अस्मिन् विषये विशेषरूपेण चर्चा विहिता ।

#### ९.२.१ प्रतिभा

प्रतिभा काव्यसाधनायाः प्रमुखो हेतुः । प्रतिभां विना काव्यंलिखितुमसम्भवः प्रायः ॥ काव्ये छन्दोज्ञानं श्लिष्टपदज्ञानम् पदावलीनां ज्ञानं, व्याकरण-कोशादीन् विना कविप्रतिभां न जागर्ति । समाजस्य व्यावहारिकैतिहासिकपक्षान् दृष्ट्वा शास्त्राध्ययनाज्ज्ञानं प्राप्यते ।

#### ९.२.२ व्युत्पत्तिः

काव्यशास्त्राध्ययनं व्यवहारे नैपुण्यार्जनञ्च व्युत्पत्तिः । भामहेन व्युत्पत्तये शब्दशास्त्रं छन्दशास्त्रं कोशइतिहाससम्बद्धकथानां समाजस्य विविधेषु व्यवहारेषु कलादर्शनसम्बद्धानि ज्ञानस्रोतांसि व्युत्पत्ति जनकानि स्वीकृतानि सन्ति । काव्यसृजनायैः काव्यकारणस्यावश्यकता दर्शितानुभूयते ।

#### ९.२.३ अभ्यासः

पुनः पुनः काव्यरचनायाः साधनविधानमेवाभ्यासः । भूयोभूयः काव्यलेखनादेवाभ्यासः सञ्जायते । यः कुशलः कविरस्ति तस्य चतुर्वर्गस्तु प्रसिद्ध काव्यशिल्पं भवति तस्य सम्पर्कनिर्देशनाभ्यामेव कुशलो ऽभ्यासः प्राप्यते इत्यस्य धारणा विद्यते ।

### ९.३ काव्यप्रयोजनम्

भामहेन चतुवर्गफलप्राप्तिः काव्यस्य प्रयोजनं स्वीकृतम् । धर्मार्थकाममोक्षाणां पुरुषार्थानां नाम चतुर्वर्गः । कलायां वैचक्षण्यार्जनं, कीर्तिः प्रीतिश्च काव्यादेव लभ्यन्ते । अतो भामहस्य मते पुरुषार्थचतुष्टयाददतिरिक्तान्यपि पूर्वोक्तानि प्रयोजनानि दृश्यन्ते । एतेषां चतुर्णां महापुरुषार्था उच्यन्ते । ते काव्यप्रयोजन रूपेण स्वीकृताः ।

"धर्मार्थकाममोक्षेषु वैचक्षण्यंकलाषुच ।
करोति प्रीति कीर्तिञ्च साधुकाव्य निवन्धनम् ॥" *(काव्यलङ्कार १/२)*

### ९.३.१ धर्मप्राप्तिः

सत्काव्यस्य रचना चतुर्वर्गफलप्राप्तये सहयोगिनी भवतीति ग्रन्थे प्रतिपादितः । । स्तोत्रकाव्यस्य निर्माणात् भगवतो विष्णो स्तुत्यादिभिः धर्मप्राप्तिर्भवति । धर्मार्थयोः सीमितता नास्ति । अनयोर्व्यापकं स्वरूपं भवति ।

### ९.३.२ अर्थप्राप्तिः

काव्यकारणादर्थप्राप्तिरपि संभवति । कविभ्योः विभिन्नव्यक्तिभ्योः पारितोषिकेनार्थप्राप्ति कुर्वन्ति । अतः कर्तव्यपालनात् तस्योपलब्धिः स्वरूपात् अर्थोऽपि स्वत उपार्जनम् भवति । अर्थोपार्जनस्येच्छापि भवितुं शक्नोति ।

### ९.३.३ कामप्राप्तिः

काव्यरचनया कामरूपस्य पुरूषार्थस्य सिद्धिर्भवति, अर्थात् कामसुखयोः प्राप्तिर्भवति ।

### ९.३.४ मोक्षप्राप्तिः

काव्यद्वारा सामाजिकानां सहृदयानां हृदये विशिष्टा भावनो जायते । भावनया मोक्षप्राप्तये कारणमित्यस्य धारणा विद्यते । चिन्तनेन, परमार्थध्यानेन वा मोक्षमार्गदर्शनं संभवति ।

### ९.४ काव्यभेदाः

भामहेन स्वविरचितस्य काव्यालङ्कारनामकग्रन्थस्य छन्द-भाषा-विषय-स्वरूपविधान दृष्ट्या चतुर्षु आधारेषु काव्यस्य विभाजनं कृतम् । अनेन गद्यपद्ययोरुभयोः छन्दस काव्यरचना भवतीति प्रस्तुतम् । भाषाधारेणानेन संस्कृत-प्राकृतापभ्रंश इति त्रिधा विभाजितम् । स्वरूपानुसारेण तु उत्पाद्यप्रख्यात-शास्त्राश्रित-कलाश्रितमिति, एवञ्च विषयवस्त्वाधारेण तु ऐतिहासिकसामाजिक-वीरपुरुषाणां कथाबहनानाञ्च चतुर्धा वर्गीकृतम् विलोक्यते ।

### ९.५ काव्यदोषाः

भामहेन काव्यालङ्कारे काव्यदोषाणां विस्तृता व्याख्या कृता । यदि काव्येषु एको दोषः स्यात्तर्हि वंशनाशायोत्पन्नं पुत्रसदृशं दोषयुक्तं काव्यं भवति । एतेन काव्यरचनाकृतेऽपि-अधर्मो न स्पृशति परन्तु दोषयुक्तः काव्यरचनेन कुपुत्रवत् कवेः काव्यं काव्यजगति स्वयम् मृत्युवरणं करोति । काव्यालङ्कारे काव्यगतदोषाणां विशदव्याख्यानपूर्वकमलङ्कारदोषाणाञ्च विवेचनं कृतम् विद्यते । प्रस्तुतग्रन्थे चतुर्षु स्थलेषु दोषाणामनित्यत्वमुपपादितम् । श्रुतिकटुदोष विवेचनान्ते, अयुक्तिमद्-दोषप्रसङ्गे, पुनरुक्त दोषप्रसङ्गे, उपमा दोषनिरूपणावसरे च । तत्र प्रथमस्थले पूर्व साधरणतया दोषाणामनित्यता प्रतिपादिता दृश्यन्ते । (काव्यालङ्कारः, १/५५ ) अनेन न्यायशास्त्रं, शब्दशास्त्रं

विना दोषरहितस्य काव्यस्य सिर्जना न भवतीति धारणा प्रस्तुता । उपर्युल्लिखितेषु तथ्येषु विचार्योत्तरवर्तिन आचार्याः भामहस्य प्रभावात् नाट्यशास्त्राद्भिन्न-विषयवस्तुनः स्वतन्त्ररूपेण व्याख्यानाच्च काव्यस्वरूपं निर्धारितम् प्राप्यते । अनेनालङ्कारानपि काव्यस्याङ्गं स्वीकृतम् । अलङ्कारान् चतुर्धा विभज्य तेषामष्टत्रिंशदिति संख्या विहिता । वक्रोक्तेरनिवार्यतां दर्शयन् नवसम्प्रदायस्याधारोल्लिखितः । काव्यरचनायैः न्याय-व्याकरणशास्त्रयोः ज्ञानस्यावश्यकता स्वीकृता ।

## ९.६ काव्यगुणः

भामहेन काव्येषु गुणानां सामान्या चर्चा कृता । भामहो गुणलक्षणं न निर्दिशति । गुणाऽपि शोभाकराः काव्यस्येति मन्यमानो भामहो गुणान्यप्यलङ्कारान् प्रचक्षते । भाविकं प्रबन्धगुणं मन्यमानोपि भाविकमलङ्कारमध्ये गणयति ।

भाविकत्वमिति प्राहुः प्रबन्धविषयं गुणम् ।
प्रत्यक्षा इव दृश्यन्ते यत्रार्थ भूतभाविनः ॥ (काव्यालङ्कारः, ३/५३ )

भामहः त्रिगुणवादस्य संस्थापकः प्रथमाचार्यः अस्ति । भामहेन समासाधारेण गुणानां वर्गीकरणं कृतम् । अनेन भरतेनोल्लिखितानां दशगुणानां श्लेषप्रसादसमतासमाधिमाधुर्य ओजपदसौकुमार्य-अर्थ-व्यक्ति-उदारता-क्रान्ति इति गुणानां माधुर्य-ओज-प्रसादगुणेषु-अन्तर्भावेन त्रिगुणवादस्य स्थापना विहिता । "काव्यालङ्कारे शब्दार्थयुगलस्य काव्यत्वम्, भरतोक्तदशगुणानां माधुर्यौजप्रसादेष्वन्तर्भावः" ( मिश्र, सन् २०१०: पृ.१८२) विहितः । अनेन दीर्घाल्पसमासादिन्नाश्रित्य च गुणानां वर्गीकरणं कृतं विलोक्यते ।

## ९.७ अलङ्कारस्य निरूपणम्

अलम्+कार शब्द योगादलङ्कारः शब्द सिद्यति । अलङ्करोतीति अलङ्कारः, अलङ्कृयते अनेन इति अलङ्कारः इति व्युत्पत्याऽलङ्काररु शब्दो निष्पद्यते । अलं शब्दः भूषणेऽपि वर्तते । काव्यात्मभूतं रसं काव्यशरीरस्थानीयशब्दार्थालङ्कारद्वारा यः अलङ्करोति सोऽलङ्कार । यथा अङ्गदादयःशरीरशोभातिशायिनं शरीरिणमुपकुर्वन्ति, तथानुप्रसोपमादयः शब्दार्थ शोभातिशायिनो रसादेरूपकारकालङ्कारास्थिता इति नैषां गुणवदावश्यकी स्थिति, काव्ये ऽलङ्कारस्य विषये विभिन्नैः समालोचकैरपि स्वकीया धारणा प्रस्तुता दृश्यन्ते । लोकेऽलङ्कृता जना उत्कृष्टा सुन्दराणि च मन्यन्ते तेनैव प्रकारेणालङ्कारेण सुशोभितानि काव्यान्यापि समुत्कृष्टानि, सहृदयीनाम् आल्हादकत्वञ्च मन्यन्ते । अलङ्कार विषये प्राचीनाचार्याः भरत-भामहादयः अलङ्काराणां नाम-लक्षण-उदाहरणानां च प्रदर्शनं कृतवन्तः परं अलङ्कारस्य सर्वानुगतैकं सामान्यलक्षणं नैवोल्लिखितम् ।

ग्रन्थेऽस्मिन्नलङ्काराः काव्यस्य मूलतत्त्वरूपेण शोभाधायकतत्त्वरूपेण स्वीकृताः । अत्र द्वौ (२) शब्दालङ्कारौ षट्त्रिंशत् (३६) अर्थालङ्कारान् सम्मील्याष्टत्रिंशदलङ्काराणां वर्णनं कृतम् । अस्यालङ्काररहितं काव्यं सुन्दरं न भवतीति भामहस्य धारणा विद्यते । अनेन रसानप्यलङ्कारेष्वन्त-र्भाव्यालङ्कारवादस्य स्थापना विहिता । अतो ऽयमलङ्कारवादी आचार्य इति प्रमाणितः । अलङ्कारसम्प्रदायस्य महत्वपपूर्णा कृति **काव्यालङ्कारः** मन्यते । भामहेन शब्दार्थौ द्वयोरेव वक्रताया काव्यं स्वीकृता दृश्यते । अतः काव्यस्य सर्वाधिक मूलतत्त्व अलङ्कारोस्ति ।

भरतेन उपमा-रूपक-यमक-दीपकश्चेति चत्वारः अलङ्काराः स्वीकृताः । परन्तु भामहेन द्वौ

शब्दालङ्कारौ षट्त्रिंशत् अर्थालङ्कारान् तथा तेषां विशदां विवेचनां विधायालङ्कारं दृश्य-श्रव्य काव्येष्वनिवार्यं तत्त्वं स्वीकृतम् । अनेन अनुप्रासः- (औपनागरानुप्रास-ग्राम्यानुप्रास-लाटीयानुप्रास), यमक-रूपक-दीपक-उपमा-प्रेयः-रसवत्-ऊर्जस्वि-पर्यायोक्त-समाहित-उदात्त-श्लिष्ट-अपन्हुति-विशेषोक्ति-विरोधः । तुल्ययोगिता-अप्रस्तुप्रसंशा-व्याजस्तुतिनिदर्शना-उपमारूपक-उपमेयोपमा-सहोक्ति-परिवृत्ति-ससन्देह-अनन्वय-उत्पेक्षावयव-संसृष्टि-भाविकत्व-आक्षेप-अर्थान्तरन्यास-व्यतिरेक-विभावना-समासोक्ति-अतिशयोक्ति(अतिशयोक्तिवक्रोक्तिश्च एकमेव वस्तु अस्ति । काव्यालङ्कारे हेत्वालङ्कारस्य सङ्केतो प्राप्यते, किन्त्वाचार्य भाहेन हेत्वाख्योऽलङ्कारोऽलङ्कारः रूपेण न स्वीकृतः । अस्मिन् सन्दर्भे भामहस्य कथनमस्ति यदत्रालङ्कारे वक्रोक्तेरभावोऽतो हेतुश्च सूक्ष्मो लेशोऽथ नालङ्कारः ।

हेतुश्च सूक्ष्मो लेशोऽथ नालङ्कारतया मतः ।
समुदायाभिधानस्य वक्रोक्त्यनभिधानतः ॥ (काव्यालङ्कारः, २/८५ )

वक्रोक्त्याः अभावेन एतत् हेतु-सूक्ष्म-लेशं च अलङ्कार नमन्यन्ते । यथासङ्ख्य-उत्प्रेक्षा-स्वभावोक्ति (एतदपि केचित् अलङ्कारं मन्यन्ते । एतदर्थं अस्यमते एतदलङ्कारः नास्ति । आशीः अत्र अग्निपुराणसम्मत शब्दालङ्कार, चित्र तथा अर्थालङ्कार-हेतु-समाधिश्च परित्यज्य विंशति अलङ्कार तस्यापेक्षया अधिकं स्वीकृतम् ।

नकान्तमपि निर्भुषं विभाति वनिता मुखम् । (काव्यालङ्कारः १/१३)

आचार्यो भामहः काव्यालङ्कारे सर्वेषामलङ्काराणां वीजम् वक्रोक्ति इति स्वीकरोति । तत् कथनं यथा : - सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते ।

यत्नोऽस्यां कविनां कार्यः कोऽलङ्कारोऽनया विना ॥ (काव्यालङ्कारः, २/८६ )

भामहेन प्रस्तुता वक्रोक्तिरेव दण्डि अतिशयोक्ति नाम्ना स्थापितः । अनेन काव्येषु वक्रोक्तिः अनिवार्यं तत्त्वं स्वीकृतम् । तमाधारीकृत्य कुन्तकः वक्रोक्तिसम्प्रदायस्य प्रवर्तकः आसीदिति मन्यते ।

**९.८ महाकाव्यस्य लक्षणनिरूपणम्**

भामहेन महाकाव्यसिद्धान्तं निरूप्य काव्यलक्षणमपि प्रस्तुतम् । अस्य महाकाव्यसम्बन्धिता धारणा प्रथमा मन्यते । सर्गबन्धः महत्सु महाकथा समावेशनमेव महाकाव्यस्य मूलाधारः । ग्रामीण परिवेशस्य शब्दार्थौ न प्रयोक्तव्यौ । आलङ्कारिकञ्च सदाश्रितं मन्त्रदूतप्रयाणादीनां प्रयोक्तव्यम् । पञ्चसन्धियुतता च भवेयम् । बहुव्याख्या च न भवेदिति तस्य महाकाव्यस्य लक्षणेन ज्ञायते ।

**१०. भामहस्यावदानमूल्याङ्कनम्**

पौरस्त्यसाहित्यक्षेत्रे काव्यस्य भेदप्रदर्शनपूर्वकं दोषालङ्कारादिनिरूपणं महाकाव्यस्य परिभाषायाधारभूतायाः धारणायाः स्थापने प्रवर्तने चास्य महत्त्वपूर्णा भूमिका विद्यते । भरतमुने नाट्यशास्त्रात् पृथकरूपेण काव्यालङ्कारस्य रचना स्वयमेव संस्कृतकाव्यचिन्तने द्रलङ्कारसिद्धान्तस्य प्रवर्तने च भामहस्य महत्वपूर्णं योगदानमस्ति ।

**११. निष्कर्षः**

अस्मिन् ग्रन्थेः काव्यस्य प्रमुखाङ्गानां गुणालङ्कारादीनां विवेचनं विहितं दृश्यते । गुणः,रसालङ्कारादिषु, विशदं विश्लेषणं विधाय त्रिगुणवादस्य स्थापना विहिता वर्तते ।

अलङ्कारशास्त्रस्य प्रथमाचार्यः भरतस्य नाट्यशास्त्रं नाट्यविधाया एव ग्रन्थोऽस्ति। किन्तु भामहस्य 'काव्यालङ्कारः' सकलकाव्यशास्त्रस्य काव्याङ्गस्य च मूलमस्ति। भामहेन भरतेन नाट्यशास्त्रे चत्वारः अलङ्काराः वर्णिताः, अनेन अष्टत्रिंशत् सङ्ख्यकानां अलङ्काराणां चर्चा विहिता । काव्यालङ्कारेषु द्वयोरलङ्कारस्य दोषः, न्याय-निर्णय एवं शब्दशुद्धि पञ्च विषयः विश्लेषितो दृश्यते। अस्य प्रथम परिच्छेदे काव्यस्य साधन-लक्षण-भेदानां चर्चा विहिता। द्वितीय-तृतीयपरिच्छेदेऽलङ्कारस्य चर्चास्ति । चतुर्थपरिच्छेदे पञ्चाशत्पद्येषु भरतेन प्रतिपादितानां दशगुणानां चर्चा विद्यते । पञ्चमपरिच्छेदे सप्तति पद्ये काव्यदोषाः तेषां समाधानोपायं विद्यते । शब्दज्ञानं-न्यायज्ञानञ्च षष्ठमपरिच्छेदे शब्दशुद्धीकरणसम्बन्धिता विस्तृता व्याख्या विद्यते।

**सन्दर्भसामग्रीविवरणम्**


कृष्णकुमारः (सन् १९९८), *अलङ्कारशास्त्र का इतिहास,* मेरठ : साहित्यभण्डार।

भामहः, (२०१९), *काव्यालङ्कारः,* पटना : विहार राष्ट्रभाषा परिषद् ।

मम्मटः (सन् २००३), *काव्यप्रकाशः,* (व्याख्या सत्यव्रतसिंहः ) वाराणसी : चौखम्बा विद्याभवनम्।

मिश्रः, रामचन्द्रः, (सन् २०१०), *संस्कृतसाहित्येतिहासः,* वाराणसी : चौखम्बा विद्याभवनम्

सुधांशुः, समरेन्द्रकुमारः ( सन् २०१२), *संस्कृत साहित्ये सौन्दर्यतत्त्व-समीक्षणम्,* वाराणसी : कला एवं धर्मशोधसंस्थानम्।

हिरा, राजवंशसहायः (२०२६), *अलङ्कारानुशीलनम्,* वाराणसी : चौखम्बा विद्याभवनम्।